শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৭৭

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৭৭

*উপশ্লোকোতপত্তিৱর্ণনং জরাসন্ধাদিযুদ্ধৱর্ণনং*
*মুচকুন্দানুগ্রহৱর্ণনং চ*

সৈরন্ধ্র্যাস্তদনু চিরং স্মরাতুরাযা
যাতোঽভূঃ সুললিতমুদ্ধৱেন সার্ধম্।
আৱাসং ত্বদুপগমোতসৱং সদৈৱ
ধ্যাযন্ত্যাঃ প্রতিদিনৱাসসজ্জিকাযাঃ॥ ১ ॥

উপগতে ত্বযি পূর্ণমনোরথাং
প্রমদসম্ভ্রমকম্প্রপযোধরাম্।
ৱিৱিধমাননমাদধতীং মুদা
রহসি তাং রমযাঞ্চকৃষে সুখম্॥ ২ ॥

পৃষ্টা ৱরং পুনরসাৱৱৃণোদ্ৱরাকী
ভূযস্তৱযা সুরতমেৱ নিশান্তরেষু।
সাযুজ্যমস্তৱিতি ৱদেত্ বুধ এৱ কামং
সামীপ্যমস্তৱনিশমিত্যপি নাব্রৱীত্ কিম্॥ ৩ ॥

ততো ভৱান্ দেৱ নিশাসু কাসুচি-
ন্মৃগীদৃশং তাং নিভৃতং ৱিনোদযন্।
অদাদুপশ্লোক ইতি শ্রুতং সুতং
স নারদাত্ সাত্ত্বততন্ত্রৱিদ্ বভৌ॥ ৪ ॥

অক্রূরমন্দিরমিতোঽথ বলোদ্ধৱাভ্যা-
মভ্যর্চিতো বহু নুতো মুদিতেন তেন।
এনং ৱিসৃজ্য ৱিপিনাগতপাণ্ডৱেয-
ৱৃত্তং ৱিৱেদিথ তথা ধৃতরাষ্ট্রচেষ্টাম্॥ ৫ ॥

www.prapatti.com

ৱিঘাতাজ্জামাতুঃ পরমসুহৃদো ভোজনৃপতে-
জর্রাসন্ধে রুন্ধত্যনৱধিরুষান্ধেথ মথুরাম্।
রথাদ্যৈর্দ্যোর্লব্ধৈঃ কতিপযবলস্তৱং বলযুত-
স্ত্রযোৱিংশত্যক্ষৌহিণি তদুপনীতং সমহৃথাঃ॥ ৬ ॥

বদ্ধং বলাদথ বলেন বলোত্তরং ত্বং
ভূযো বলোদ্যমরসেন মুমোচিথৈনম্।
নিশশেষদিগজযসমাহৃতৱিশ্বসৈন্যাত
কোন্যস্ততো হি বলপৌরুষৱাংস্তদানীম্॥ ৭ ॥

ভগ্নঃ স লগ্নহৃদযোপি নৃপৈঃ প্রণুন্নো
যুদ্ধং ত্বযা ৱ্যধিত ষোডশকৃত্ব এৱম্।
অক্ষৌহিণীঃ শিৱ শিৱাস্য জঘন্থ ৱিষ্ণো
সম্ভূয সৈকনৱতিত্রিশতং তদানীম্॥ ৮ ॥

অষ্টাদশেস্য সমরে সমুপেযুষি ত্বং
দৃষ্টৱা পুরোথ যৱনং যৱনত্রিকোট্যা।
ত্বষ্ট্রা ৱিধাপ্য পুরমাশু পযোধিমধ্যে
তত্রাথ যোগবলতঃ স্বজনাননৈষীঃ॥ ৯ ॥

পদভ্যাং ত্বং পদ্মমালী চকিত ইৱ পুরান্নির্গতো ধাৱমানো
ম্লেচ্ছেশেনানুযাতো ৱধসুকৃতৱিহীনেন শৈলে ন্যলৈষীঃ।
সুপ্তেনাঙঘ্র্যাহতেন দ্রুতমথ মুচুকুন্দেন ভস্মীকৃতেস্মিন
ভূপাযাস্মৈ গুহান্তে সুললিতৱপুষা তস্থিষে ভক্তিভাজে॥ ১০ ॥

ঐক্ষৱাকোহং ৱিরক্তোস্ম্যখিলনৃপসুখে ত্বতপ্রসাদৈককাঙক্ষী
হা দেৱেতি স্তুৱন্তং ৱরৱিততিষু তং নিস্পৃহং ৱীক্ষ্য হৃষ্যন্।
মুক্তেস্তুল্যাং চ ভক্তিং ধুতসকলমলং মোক্ষমপ্যাশু দত্বা
কার্যং হিংসাৱিশুধ্যৈ তপ ইতি চ তদা প্রাত্থ লোকপ্রতীত্যৈ॥ ১১ ॥

তদনু মথুরাং গত্বা হত্বা চমূং যৱনাহৃতাং
মগধপতিনা মার্গে সৈন্যৈঃ পুরেৱ নিৱারিতঃ।
চরমৱিজযং দর্পাযাস্মৈ প্রদায পলাযিতো
জলধিনগরীং যাতো ৱাতালযেশ্বর পাহি মাম্॥ ১২ ॥

www.prapatti.com

★★★★★★★★★★

www.prapatti.com